Sc. 9 10

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥अथमूल्याध्यायवृत्तिः॥

॥पत्र २५॥

॥श्रीगणेशायनमः॥नत्वाश्रीशंभोर्हिनीरूपदेहंमातापित्रोश्चापिपादौकराभ्या
म्॥धृत्वामूल्याध्यायवृत्तिंविधत्तेज्योतिर्विश्रीबालकृष्णार्यसूनुः॥१॥यस्याम्र
जोयाज्ञिकमर्मभेत्ताप्रचंडयज्ञादिविधौपृथिव्यां॥अभूच्चनाम्नाकिलव्यंकटा
द्रिप्रभोश्चपश्चाज्जनएकआसीत्॥२॥तत्रकात्यायनाचार्योऽभ्यर्हितत्वात्सर्व
त्रप्रदेयत्वाच्चगोमूल्यमेवप्रथमतोवदति॥॥द्वात्रिंशत्पणिकागावइति॥अ
त्रगावइतिजात्यभिप्रायेणबहुवचनं॥जात्याख्यायामेकस्मिन्नबहुवचनमन्य
तरस्यामितिसूत्रात्॥द्वाभ्यामधिकास्त्रिंशतद्वात्रिंशत्पणाःमूल्यंयस्याःसाद्वा
त्रिंशत्पणिकागौः॥द्वात्रिंशत्पणपरिमितंगोमूल्यमित्यर्थः॥कोनामपणइत्य राम
पेक्षायांपणस्वरूपंतावन्मयूखेव्यवहारसंज्ञकेभट्टनीलकंठैःपणस्त्विस्याद्या २

द्यार्योक्तश्चपणइत्येतद्ग्रंथसंदर्भेणद्विधोक्तं॥यत्तुकेनचिदाधुनिकेनस्वकपो
लकल्पितोक्षिप्तकल्पनांमनसिनिधायपणस्वरूपंपंचधेत्युक्तं॥तन्नसमंज
सं॥मूलवाक्याभावान्मनुयाज्ञवल्क्यकात्यायनसिद्धांतशिरोमणिद्विविध
गणितसाराद्यनेकग्रंथविरोधापत्तेश्च॥अत्रमनुना॥लोकेसंव्यवहारार्थं
याःसंज्ञाःप्रथिताभुवि॥ताम्ररौप्यसुवर्णानांताःप्रवक्ष्याम्यशेषतइतिपूर्वपी
ठिकांस्वांतेनिधायत्रसरेण्वादिधरणसंज्ञाकथनानंतरंद्वेहलस्तलइत्यादिना
प्रकारांतरेणराजतधरणसंज्ञायांरौप्यमानमुक्त्वाकार्षापणविषयेताम्रमा
नमेवोररीकृतं॥अतएवकुल्लूकभट्टैःताम्ररौप्यसुवर्णानामितिमूलेताम्रस्यै
वादौप्रयोगात्याःपणादिसंज्ञाइतिसमसंबंधीविधिर्दर्शितः॥याज्ञवल्क्या

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

चार्यैस्तत्मुख्यत्वेनधरणादिविषयेरोप्यमानमुल्कानिष्ककथनानंतरंपणवि
षयेतान्रमानमेवोक्तं॥सिद्धांतशिरोमणौभास्कराचार्यैस्तुकपर्दकामाने
नपणस्वरूपमुक्तं॥द्विविधगणितसारेवीरसिंहदैवज्ञैरपितथैवोक्तं॥अतो
यदुक्तंमयूरेवनत्तस्म्यक्॥॥तत्रद्विविधपणस्वरूपमध्येआद्यमाहकात्या
यनः॥तान्रकर्षैपणस्मृतइति॥अत्रकर्षसंज्ञाविनापणसंज्ञाऽनर्थक्या
त्कर्षेसंज्ञांतावच्छोकद्वयेनाहलीलावत्यांभास्कराचार्यः॥तुल्यायवाभ्यां
कथितात्रगुंजावत्तस्त्रिगुंजोधरणंचतेषां॥गद्याणकस्तत्द्वयमिंद्रतुल्यैर्व
त्तैस्तथैकोधटकःप्रदिष्टः॥१॥दशार्धगुंजंप्रवदंतिमाषंमाषाख्यैःषोडशा
भिश्चकर्षैकर्षैश्चतुर्भिश्चपलंतुलाज्ञाःकर्षैसुवर्णस्यसुवर्णसंज्ञं॥२॥अ



नयोःश्लोकयोरर्थः॥गुंजाप्रसिद्धाज्ञातपाकीबीजं॥यवाभ्यांतुल्याऽत्रगुंजाक
थिता॥यवश्चयवश्चयवौ॥स्वरूपाणामेकशेषएकविभक्तौ॥यःशिष्यतेस
तुल्यस्याप्यभिधायी॥ताभ्यांयवाभ्यांयवद्वयगुरुत्वेनसमात्रशास्त्रेगुंजाक
थितानिरूपिता॥शास्त्रांतरेघन्यथागुंजाकथितास्तीतिभावः॥तथात्रिगुंजो
वत्तःस्यात्॥त्रिस्त्रोगुंजामानंयस्येतित्रिगुंजः॥गुंजात्रयगुरुत्वाधिकरणो
वत्तःस्यात्॥चपरतेअष्टोवत्ताःधरणंप्रोक्तं॥वत्ताष्टकगुरुत्वेनचतुर्विंश
तिगुंजासमंधरणंभवति॥तथाततद्द्वयंगद्याणकः॥तच्चतुष्केनधरणंधर
णद्वयेनषोडशवत्तात्मकेनाष्टाचत्वारिंशद्गुंजासमोगद्याणकःस्यात्॥त
यासमुच्चये॥नद्वतद्वंद्वतुल्यैश्चतुर्दशभिर्वत्तैरेकोधटकःप्रदिष्टः॥द्विच

त्वारिंशद्गुंजासमानाधिकरणोधटकइत्यर्थः॥एकइतिप्रत्येकंसंबंधनीयं॥द
शार्द्धगुंजमाषंप्रवदंति॥दशानामर्धंपंचतन्मिताः गुंजाःमानंयस्यासौदशार्ध
गुंजःतंमाषंप्रवदंति।केतुलाज्ञाः॥तुलातुलनंतुलंजानंतितेतुलाज्ञाःपुरात
नाः॥चपरंषोडशभिर्माषाख्यैःकर्षंप्रवदंति॥तथातैश्चतुर्भिःकर्षैरेकंप
लंप्रवदंति॥अथसौवर्णकर्षस्यसंज्ञांतरमाह॥कर्षमिति॥सुवर्णस्यकर्षसु
वर्णसंज्ञंप्रवदंति॥कर्षमितंसुवर्णमितंसुवर्णमिति॥वाच्यमितिशेषः॥ननुरौ
प्यस्यापि॥तडंकंहनुमन्नाटके॥सुवर्णस्यसुवर्णस्यसुवर्णस्यचजानकी॥प्रे
क्षितंतवरामेणसुवर्णेनांगुलीयकमिति॥एवंरजतमुक्काचूत्रकस्तूरीकर्पू
रपट्टसूत्रताम्रादितोल्यकर्षइत्येवसंज्ञा।हेम्नस्तोल्येतुकर्षःसुवर्णइतिवा

राम ३

संज्ञायांसुवर्णेप्रतिमांदद्यादित्यत्रकर्षमात्रकनस्यैवप्रतिमांदद्यादितिभावः
॥पलादधिकाअपिसंज्ञोक्तादेमाद्रौव्राह्मे॥पलानांविंशतिर्वीसीपंचवांस्य॰
स्तुलास्मृताश्चतोलिकःसएवस्याद्भारोविंशतितोलिकइति॥अमरेपिमानं
तुलांगुलिप्रस्थेगुंजाःपंचाद्यमाषकः॥तेषोडशाक्षःकर्षोस्त्रीपलंकर्षेचतु
ष्टयं॥सुवर्णबिस्तोहेम्नाक्षेकुरुबिल्वस्तुतत्फले॥तुलास्त्रियांपलशतंभारः
स्याद्विंशतिस्तुला॥आचितोदशभारास्युःशाकटोभारआचितइत्युक्तं॥
द्विविधगणितसारेवीरसिंहोपिगुंजादिमानमुक्त्वे॥गुंजाथात्रयवद्वयं२नि
गदितावल्लत्रिर्गुंजोऽष्टभिर्वल्लैःदस्याद्धरणंतुतस्यमुगलं२गद्याणकोयं
भवेत॥मायाख्यस्त्रिभिःपंचगुंजकैर्मतःकर्षेतदष्टा१द्धपलाख्यंतत्कर्षेच

मू॰ नुषयं॥स्वविषयाख्यान्यत्रवेयानिचेति॥१॥मन्वादिस्मृतिषुयवत्रयसम
४ नाधिकरणंगुंजामानमुक्तं॥तथाचमनुः॥लोकेसंव्यवहारार्थंयाःसंज्ञाप्र
थिताभुवि॥ताम्ररूप्यसुवर्णानांताःप्रवक्ष्याम्यशेषतः॥जालांतरगतेर्भा
नोर्यत्सूक्ष्मंदृश्यतेरजः॥प्रथमंतत्प्रमाणानांत्रसरेणुंप्रचक्षते॥त्रसरेण
वोष्टौविज्ञेयालिक्षैकापरिमाणतः॥ताराजसर्षपास्तिस्रस्ते त्रयोगौरसर्ष
पः॥सर्षपाःषट्यवोमध्यस्त्रियवंत्वेककृष्णलंपंचकृष्णलकोमाषस्तेसुव
र्णस्तुषोडश॥पलंसुवर्णाश्चत्वारःपलानिधरणंदश॥द्वेकृष्णलेसमधृतेवि
ज्ञेयोरौप्यमाषकः॥तेषोडशःस्याद्धरणंपुराणश्चैवराजतःकार्षापणस्तु राम
विज्ञेयस्ताम्रिकःकार्षिकःपणः॥धरणानिदशज्ञेयःशतमानस्तुराजतः॥ ४

---

चतुःसौवर्णिकोनिष्कोविज्ञेयस्तुप्रमाणतइत्यादि॥अस्यार्थःकृष्णकभट्टीय
मन्वर्थमुक्तावल्यामुक्तः॥सयथा॥लोकेति॥ताम्ररूप्यसुवर्णानांयाःपणादि
संज्ञाःक्रयविक्रयादिलोकव्यवहारार्थंपृथिव्यांप्रसिद्धास्तादृङ्नाद्यपयोगार्थं
साकल्येनकथयिष्यामि॥जालेति॥गवाक्षविवरप्रविष्टस्यसूर्यरश्मिषुयत्सूक्ष्मं
रजोदृश्यतेतत्तदृश्यपरिमाणानांप्रथमंत्रसरेणुंवदंति॥त्रस रेणवइति॥अ
ष्टौत्रसरेणवोलिक्षैकापरिमाणेनज्ञेया॥तास्तिस्रोराजसर्षपोज्ञेयःतेत्रयो
गौरसर्षपः॥सर्षपाइति॥गौरसर्षपाःषट्मध्योनातिस्थूलोनातिसूक्ष्मोयवः
स्यात्॥त्रिभिर्यवैःकृष्णलंरक्तिकेतिप्रसिद्धं॥तैःपंचभिर्माषः॥षोडशमा
साःसुवर्णःस्यात्॥पुल्लिंगश्चायंपरिमाणवचनः॥पलमिति॥चत्वारःसुवर्णाः

पलंस्यात्॥दशपलानिधरणंस्यात्॥द्वेकृष्णलइति॥कृष्णलत्रयंसमंकृत्वातु
लयाहृत्तंरूप्यमाषकोबोद्धव्यः॥तेषोडशेति॥तेरूप्यषोडशमाषकारौप्य
धरणंपुराणश्चराजतोरजतसंबंधीस्यात्॥कार्षिकःकर्षप्रमाणःताम्रि
कस्ताम्रमयःकार्षापणःपणइतिचज्ञेयः॥कर्षश्चशास्त्रीयपलचतुर्थभा
गोबोद्धव्यः॥अतएवपलंकर्षचतुष्टयमित्याभिधानिकाः॥धरणानीति।
दशरूप्यधरणानिरौप्यशतमानोज्ञातव्यः॥चतुर्भिःसुवर्णैर्निष्कःप्रमाणे
नबोधव्यइति॥याज्ञवल्क्योपि॥जालस्थसूर्यमरीचिस्पंत्रस रेणुरजःस्मृतं
।तेषोत्रिक्षातुतास्तिस्रोराजसर्षपउच्यते॥१॥गौरस्कृतेत्रयःषड्यवोम ग्रम
ध्यस्कृतेत्रयः॥कृष्णलःपंचतेमाषस्तेसुवर्णस्कृषोडश॥२॥पलसुवर्णश्च ५

न्वारःपंचवापित्रकीर्त्तितं॥द्वेकृष्णलेरूप्यमाषोधरणंषोडशैवते॥३॥शतमानं
तदग्निर्धरणैःपलमेवतु॥निष्कंसुवर्णश्चत्वारःकार्षिकस्ताम्रिकःपण
इति॥अस्यार्थोविज्ञानेश्वरप्रणीतमिताक्षरायां॥॥कृष्णलादिशब्दानांनि
य तपरिमाणविषयत्वंदंडव्यवहारेदर्शयितुमाह॥जालेति।जालकांतर
स प्रविष्टादित्यरश्मिस्थितंरजस्त्रेरेणुरित्युक्तं॥कैः॥ योगीश्वरादिभिस्तत्व
दर्शिभिः॥तेत्रसरेणवोष्टौलिक्षास्तेदजंयूकांडं॥तालिक्षास्तिस्रोराजसर्ष
पोराजिका।तेराजसर्षपास्त्रयोगौरसर्षपःसिद्धार्थः॥गौरसर्षपाःषट्यवो
मध्योमध्यमोनस्थूलोनसूक्ष्मः॥एतेनगौरसर्षपाअपिमध्यमाइतिगम्यते।
तथाराजसर्षपाअपिमध्यशब्दादेव॥सर्षपादिशब्दानकेवलमुन्मानवच

नाः॥किंनुतदुन्मितद्रव्यक्वचनागम्यंते। यथाप्रस्थपरिमिताःयवाःप्रस्थाउच्यंते।
एवंसर्षपाद्यन्मितंद्रव्यं॥सर्षपादिशब्दैः सर्षपादिशब्दानांचकेवलोन्मानव
चनत्वेत्रस रेण्वनापहत्योन्मानुमशक्यत्वात्॥तद्धारेणह्कुलादिव्यवहा
रोनस्यात्॥तत्रस्थूलःस्थूलतरःस्थूलतमश्च॥सूक्ष्मःसूक्ष्मतरःसूक्ष्म
तमः॥मध्यसर्षपाद्यन्मानभेदेनप्रतिदेशंव्यवहारभेदेनप्रतिदेशंव्यवहार
भेदेस्थितेदंद्रव्यवहारेमध्यशक्तिनियम्यते। तेमध्यमायवास्त्रयएकःह्कुलः
तेह्कुलाःपंचैकोमाषः॥तेमाषाःषोडशैकंसुवर्णः॥सुवर्णाश्चत्वारःपलंप
चवापिपलंकीर्त्तितंनारदादिभिः॥एवंसुवर्णस्योन्मानंप्रतिपाद्येदानींरज राम
तस्याह॥द्वेकृष्णलरति॥द्वेकृष्णलेरूप्यमाषोरूप्यसंबंधीमाषः।तेमाषाः ६

षोडशधरणं॥पुराणइत्यस्यैवसंज्ञांतरं॥तेषोडशास्याधरणंपुराणश्चैवराज
तमितिस्मरणात्॥द्रव्यमिर्धरणैःज्ञातमानंपलमितिवाभिधीयते॥पूर्वोक्ता
श्चत्वारःसुवर्णाएकोराजतोनिष्कोभवति॥इदानींताम्रस्योन्मानमाह।का
र्षिकइति।पलस्यचतुर्थांशःकर्षइतिलोकप्रसिद्धः॥कर्षोन्मितःकार्षिकः।
ताम्रस्यविकारस्ताम्रिकः॥कर्षसंमितस्ताम्रविकारःपणसंज्ञोभवति।कार्षो
पणसंज्ञश्च॥कार्षापणस्तुसंज्ञायस्ताम्रिकःकार्षिकःपणइतिमनुः॥पंच
पसुवर्णपलपक्षेविंशतिमाषःपणोभवति॥तथासतिंमोभागःपणस्यपरिकी
र्त्तितइत्यादिव्यवहारःसिद्धोभवति।चतुःसुवर्णपलपक्षेतुषोडशमाषः
पणोभवत्यस्मिंश्चपक्षेसुवर्णपणकार्षापणशब्दानांसमानार्थत्वेपिपण

कार्षापणश्चौतास्रविषयावेव॥एवंतावद्धेमरूप्यताम्राणामुन्मानमुक्तंदंड
व्यवहारायुक्त्वात्तत्कांस्यरीरिकादीनामपिलोकव्यवहारांगभूतानांमे
योन्मानंद्रष्टव्यमिति॥ननुद्विविधगणितसारसिद्धांतशिरोमणिकाराभ्यांयव
द्वयात्मकगुंजामानेनमाषादिसंज्ञोक्तामनुयाज्ञवल्क्याभ्यांतुयवत्रयात्मकगुं व
जामाननोक्तेतिपरस्परंविरोधेसतीयत्ताविशेषाविछिन्नत्वेनेदमित्यमा
षादिनिर्णेयःकर्तुमशक्यइतिचेत्॥वार्त्तमाह॥अत्रवीरसिंहभास्कराचा॰
र्याभ्यांगुरुत्वबद्धयाप्तिप्रायेणगुंजामानमंगीकृतं॥मनुयाज्ञवल्क्याभ्यांतु
मध्यवत्रयाप्तिप्रायेणोत्कृष्टयोःपक्षयोरपितुल्यासमानाधिकरणत्वान्मा राम
नवैषम्याभावादविरोधत्वादियत्ताविशेषावछिन्नत्वेनेदमित्यशास्त्रीय ७

माषादिनिर्णेयःकर्तुंशक्यएवेतिदिक्एवंचपंचगुंजामानेनशास्त्रीयषोड
शमाषात्मकःकर्षः॥सएवसुवर्णकर्षयोरेकमानत्वाद्व्यवहारीयाष्टगुंजा
मानेनदशमाषात्मकोभवतीत्यर्थः॥अतएवप्रयोगरत्नेनारायणभट्टैः
प्रत्याम्नायप्रस्तावेनिष्कंसुवर्णाश्चत्वारइतिपरिभाषांहृदिनिधायनिष्क
श्लोकशास्त्रयोरेकवाक्यतायांचत्वारिंशन्माषाइत्युक्तं॥प्रयोगसारेविश्व
नाथभट्टैरपिसुवर्णशब्देनव्यावहारिकदशमाषाइत्युक्तं॥एतेनताम्रक
र्षेणःपेस्मृतइत्यत्रकर्षोन्मितेनव्यवहारिकदशमाषात्मकेनताम्रेणपण
लक्षणंभवतीतिसिद्धंस्यष्टीकृतंचेदंबृहस्पतिनापि॥ताम्रकर्षमितामुद्रा
विज्ञेयस्ताम्रिकःपणइति॥॥अथद्वितीयंपणस्वरूपंभास्कराचार्यैःसिद्धां

नशिरोमण्यंतर्गतव्यक्तगणितसंज्ञकलीलावत्यामुक्तं॥वराटकानांदशकद्व
यंयत्साकाकिणीतास्त्रपणश्चतस्र इति॥अस्यार्थः सूर्यदैवज्ञगणेशदैवज्ञा
भ्यांगणितामृतरूपिकाबुद्धिविलासिन्योरुक्तः॥वराटकानांयत्दशकद्व
यंसाकाकिणीप्रोक्तासमुद्राऽऽसन्नाः शंखशुक्त्यादिवर्जीवविशेषावराट
काःकपर्दकास्तेषांदशकद्वयंकाकिणीप्रमाणंविंशतिवराटकात्मकस्का
किणीतिसंज्ञास्तीत्यर्थः॥चपरंताःपूर्वमुक्ताश्चतस्रःकाकिण्यःएकीकृताःस
त्रपणइत्यपरोऽव्यक्तशःस्यात्॥द्विविधगणितसारेपि॥काकिण्यष्टिवरा
टकैःशरगुणैराऽऽ२०श्चतस्रःपणइति॥आकाशाष्ट ८०संख्यैर्वराटकैःप राम
णइत्यर्थः॥अत्रव्यावहारिकढबूकस्यविंशतिमाषात्मकत्वेनगगनरूप ८

---

१६०संमितगुंजात्मकत्वात्पणस्याशीति८०गुंजात्मकत्वाद्द्वाविंशत्यधिकागा व
इत्यनेनषोडशढबूकात्मकंगोर्मूल्यंभवति॥द्वितीयमानेनतुशून्यरसतत्व
२५६०संमिताःवराटकाःगोर्मूल्यत्वेनभवंति॥इतिमानद्वयाभ्यांगोमूल्यमुक्तं।
तृतीयंनिष्कात्मकंगोमूल्यंतुश्रायश्चित्तमयूखेनीलकंठभट्टैःप्राजापत्यप्रसा
क्षायानुल्लागवामभवेन्निष्कंस्यान्नदर्धपादएववेतिमाधवधृतब्रह्मपुराण
स्मरसाऽऽक्तं॥भट्टोजीदीक्षितैरपितथैवोक्तं॥कर्मविपाकार्केरंकरभट्टैरुक्त।
मिताक्षरायांमाधवीयेचस्मृत्यंतरे॥प्राजापत्यक्रियाशक्तौधेनुंदद्याद्द्विजो
त्तमः॥धेनोरभावेदातव्यंमूल्यंतुल्यंनसंशयः॥मूल्यंचनिष्कमर्धंतदर्धंवा
॥तदभावेतुनिष्कंस्यान्नदर्धंपादएववेतिमिताक्षरायांस्मरणात्।तल्लक्षेन

धेनुरेवात्रपरामृश्यते॥तेननदक्षावेऽस्यस्थानेगवामभावेऽतिमाधवीये
ब्रह्मपुराणेयःपादस्तत्रापिगोपदंधेनुपरमेवाधेन्रपक्रमात्। कूर्म्मोदेव्य
युतंचैवऽदवासस्तथैवच॥धेनुप्रदानंविप्रायसममेतच्चतुष्टयमितिपराश
रेणापिप्राजापत्यप्रत्याम्नायत्वेनधेनोरेवोक्त्वाच्चेसुक्तं॥अत्रमयूखादिमू
तेप्राजापत्यप्रत्याम्नायत्वेनधेनुगावौभवतः॥तयोर्निष्कादिमूल्यंच॥कर्म
विपाकार्ककृन्मतेतुधेनुरेवप्रत्याम्नायत्वेनभवतितस्याःनिष्कादिमूल्यंच॥
नतुगोः।नापितस्यामूल्यं॥स्मृत्यर्थसारेतु।प्राजापत्येधेनुप्रदानंतन्मूल्यदा
नंवा।गोदानंतन्मूल्यदानंवा। तच्चगोमूल्यंनिष्कंनिष्कार्धंनिष्कपादंवादद्या राम
दित्यनेनगोविषयकमेवनिष्कादिमूल्यमुक्तं॥तन्मतेधेनुमूल्यदशकार्षापण ९

णाथेनाविशेषेव॥ननुनिष्कादिः॥रूप्यपरिमाणेनिष्कपरिभाषामाहयाज्ञवल्क्यः
निष्कंसुवर्णाश्चत्वारइति।इदंपूर्वमेवव्याख्यातं॥सुवर्णचतुष्टयसमतोलितंरू
प्यंनिष्कमित्यर्थइतिमयूखकारः॥राजतोनिष्कइतिकर्मविपाकार्कधृतएवं
चत्वारिंशन्माषप्रमितोनिष्कइत्यर्थः॥तत्प्रमितसुवर्णरौप्यं वाग्राह्यमिति।
मुख्यंसुवर्णतदशकौरजतंग्राह्यमितिप्रयोगरत्नेभट्टाःसुवर्णरजतनिष्कयो
र्विकल्पइतिद्योतकारः॥लीलावत्यांत्वन्यथानिष्कस्वरूपमुक्तं॥तेषोडशाऽम्म
इहावगम्योऽम्मेस्तथाषोडशभिश्चनिष्कइति॥अस्यार्थः।तथातेषोडशप
णाःसंयोजिताःसंतोऽम्मःस्यात्॥तथाऽहास्मिन्शास्त्रेषोडशभिर्दम्मैरेकीकृ
तैरेकोनिष्कोऽवगम्यः॥तथानिष्कानंतरंमहद्व्यांशाःसुवर्णरूपनाणांएका

दयःसंतितेसर्वेनिष्कमूल्याएवेतिपार्थक्येननिरूपिताश्चतिगणितामृतकृपि
काकारः॥तेनभास्कराचार्यमतेगगनवस्वर्क९२८०प्रमितवराटकात्मकंद
म्ममानंभवति॥तथाखगजाब्धिनखप्रमित२०४८०वराटकात्मकंनिष्क
मानंभवतीतिज्ञेयं।इदंचनिष्कादिगवादिमूल्यमतिधनिकस्यकिंचिद्धनि
कस्यमूल्यमुक्तंशूलपाणीयेषड्विंशन्मते॥धेनुःपंचभिरात्मानंमध्यानांत्रिप
राणिका।कार्षापणैकमूल्यादिदरिद्राणांप्रकीर्त्तिता॥पवित्राणांमितिक्वचि।
त्पाठः॥पुराणस्तुघात्रिंशद्राजतगुंजात्मकःपूर्वमेवोक्तः॥कार्षापणोग्रेच
ष्यमाणः॥अन्येचस्मृत्यंतरोक्ताःपक्षाविभवानुसारेणकर्मापेक्षयावाग्राह्या
इतिदिक्॥अथप्राजापत्य प्रत्याम्नायत्वेनधेन्वादिमूल्यदानेसंकल्पवाक्ये

राम ९०

किंचिदिचारः॥तत्रप्राजापत्यक्रियायांकोधेनुंदद्यात्सयज्ञिनी॥धेनोरभावेदा
नव्यंमूल्यंतुल्यंनसंशयइत्यादिमार्कंडेयसंवर्त्तादिवाक्यैःप्राजापत्यक्रियाक
र्तुमशक्तेनधेनुदानंकार्यंसाक्षाद्धेनुदानमशक्तेनधेनोर्मूल्यंतुल्यंवादेय
मितिप्रतीयते॥तुल्यमुक्तंस्मृत्यर्थसारे॥तत्समंभूधनधान्यवस्त्रादिवादद्या
दिति।अत्रधेनोरेवप्राजापत्यस्यप्रत्याम्नायत्वेनोक्तत्वान्मूल्यदानेपिधेनुपद
मेवोच्चारणीयं॥एवंगवादिदानेपि॥अत्रकेचिद्यायज्ञकामूल्यदानेनिष्क्रयप
दमप्युच्चारयंति॥यथा।अमुकप्रायश्चित्तेप्रतिप्राजापत्यंकार्षापणसंज्ञकधे
नुनिष्क्रयप्रत्याम्नायद्वारेत्यादि।तन्नुछं।मानाभावात्।मूल्यस्यधेनोःप्रतिनि
धित्वात्कार्षापणपदेननिष्क्रयेसिद्धेपौनरुक्त्यापत्तेश्च।अतएवसंस्कार कौ

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

स्कृष्टेमधुपर्कप्रकरणेऽनंतदेवैः॥गोःप्रतिनिधित्वेन छागआलभ्यतइत्यादि
जयंतमतमुल्काऽत्रापिमतेछागस्यप्रतिनिधित्वान्निष्क्रयइवनीवारेषुव्रीहि
शब्दइवगोगौरितिमातरुद्राणामितिचाविरुद्धंभवति॥गविमनसिधृतायां
द्वात्रिंशत्पणात्मकनिष्क्रयवच्छागेमनसिधृतेपणाष्टकात्मकोनिष्क्रयोदेय
इत्युक्तं।ऐकाहिकचातुर्मास्यपक्षौ॥तातचरणैरपि।धेन्वादिनिष्क्रयदानवि
कीर्षायामपिइयंधेनुरित्येवप्रयोगःकार्यः॥प्रतिनिधौमुख्यवाचकशब्दस्येवप्र
योज्यत्वेनन्यायविदांयाज्ञिकानांचसंमतत्वात्॥श्रुतिकानपिषण्णाद्राज्ञेनै
तादेवताःपरिसंख्यामजेरन्नित्यादाविवेशात्सदृशाविसदृशयोरपिप्रतिनिधि
त्वेननिममसंभवेऽपूर्वविधेरन्याय्यताअपितैःस्वीकारादिसुक्तंतेनकार्षापण



भावे

णसंज्ञकधेनुप्रत्याम्नायद्वारागोप्रत्याम्नायद्वारेतिवोहःकर्त्तुमुचितइत्युक्तं॥ ॥
इतिश्रीसकलागमाचार्यवैष्णवोपनामकयाज्ञिकात्मजविबुधेनविरचि
तायांमूल्याध्यायेद्वौगोमूल्यकथनंनामप्रथमस्तरंगः॥१॥ ॥अथवरमू
ल्यमाह॥चतुःकार्षापणोवरइति॥चत्वारःकार्षापणाःमूल्यंयस्येतिव्युत्पत्त्यका
र्षापणचतुष्टयात्मकंवरमूल्यंभवतीत्यर्थः॥कार्षापणोद्विविधः।पणसमानार्थ
कःषोडशपणात्मकश्चेतितत्राद्योमनुराहकार्षापणस्तुविज्ञेयःकार्षिकस्ताम्
म्रिकःपणइति॥अस्यार्थःपूर्वमुक्तः॥कार्षापणःकार्षिकःस्यात्कार्षिकेताम्रिके
पणइत्यमरोपि॥द्वितीयोव्रतदेमाद्रौनारदेनोक्तः।कार्षापणोदक्षिणस्यांदिशि
रौप्यःप्रवर्त्तते॥पणोनिबंधःपूर्वस्यांषोडशे वपणाःसचिति।षोडशपणाअ

षौढबूकाकार्षापणः पूर्वस्यामित्यर्थश्रुतिव्रतार्केशंकरभट्टाः॥तावतालभ्यंरूप्यं
दक्षिणस्यांसश्रुतिधृतनिर्णयेभट्टशंकरचरणाः॥तावतेत्यष्टढबूकैर्यल्लभ्यंकिं
चिदधिकमापत्रयात्मकंरूप्यमित्यर्थः॥अयंतस्यैवभेदः।तन्मूलत्वात्॥अत्र द
क्षिणग्रहणंस्वसन्निहितपश्चिमदिगुपलक्षणं।एवंपूर्वग्रहणमुत्तरदिगुपल
क्षणं॥आकांक्षितत्वादितिकर्मविपाकार्केश्वरः।लक्षणद्वयात्मककार्षापणमध्ये
विज्ञानेश्वरश्शूलपाणिनीलकंठभट्टैर्मनूक्त एवादृतः॥कर्मविपाकार्केशंकर
भट्टैस्तु॥चनुःकार्षापणोवरइत्यादौमनूक्तपणपर्यायकार्षापणस्याग्रहणेना
रदोक्तकार्षापणस्यचशिष्टानांग्रहणेकिंबीजमितिचेत्शृणु॥तस्यतज्जातीय राम
स्यतदुत्पन्नस्यवत्सस्यलाभः॥अन्यथाधेनुत्वस्यजातित्वाभावेनतत्संग्हाना १२

पत्तेः।नचपणपर्यायेणकार्षापणेनगोत्वजातीयस्यवत्सादेर्धेनूत्पन्नस्यवाक्य
मपिलाभःसंभवतीत्यदृष्टार्थतामूल्यस्यस्यात्॥नारदोक्तषोडशपणात्मकका
र्षापणेननुतयोःकथंचिल्लब्धुंशक्यत्वेनदृष्टार्थतालाभादणुरपिविशेषोध्य
वसायकरश्रुतिन्यायेनतस्यैवग्रहणोचित्यात्॥अतएवोक्तकात्यायनवाक्ये
निष्केपंचाशदेवसुर्गजेपंचशतानित्यितिगजेपंचशतंकार्षापणानांमौल्यत्व
कथनंगजजातीलभाभिप्रायेणेत्यन्यथाऽदृष्टार्थतापत्तेरितिदिगित्यनेनना
रदोक्तएवादृतः॥तेनद्विबूकद्वयात्मकंशून्यनेत्रराशोन्मितकपर्दकात्रयात्मकं
षत्रिंशत्द्विबूकात्मकंत्रयोदशमाषोन्मितरौप्यात्मकंगगनार्कशरोन्मित
५१२०वराटकात्मकंचवरमूल्यंभवति॥अधुनावृषमूल्यमुच्यतेवृषषट्का

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

र्षोपणकाइति।वृषोनामप्रजोत्पादनसमर्थोऽस्पष्टंधुरः॥तस्यषट्कार्षापणका
मूल्यंभवति॥अत्रपूर्वोक्तप्रकारेणद्व्यूकत्रयात्मकं३अष्टोदध्युन्मित४८०
कपर्दकात्मकअष्टचत्वारिंशद्द्व्यूकाष्टात्मकंविंशतिमाषप्रमित२०रौप्यात्म
कशून्यवसुषट्शैलोन्मित १६८०वराटकात्मकंचवृषमूल्यंभवति॥अथा
नडुन्मूल्यमाह॥अष्टावनडुहिस्मताइति॥अनडुन्नामप्रजोत्पादनेधूर्वह
नेचसमर्थस्तस्याष्टोकार्षापणामूल्यमित्यर्थः॥अत्रापिपूर्ववत्प्रकारेणद्व्यू
कचतुष्टयात्मकंधचत्वारिंशदधिकषट्शतप्रमितकपर्दकात्मकं६४०चतुः
षष्टिद्व्यूकात्मकं६४षट्विंशतिमाषप्रमितरौप्यात्मकंखाब्ध्यक्षिदिडु॰ १३
मित१०२४०वराटकात्मकंचअनडुन्मूल्यंभवति।अथधेनुमूल्यमाह।दशको

र्षापणाधेनाविति॥धेनुर्नामवत्सप्रचुरदुग्धयुतागौस्तस्यादशकार्षापणामूल्य
मित्यर्थः॥अत्रापिपूर्वप्रकारेणपंचद्व्यूकात्मकंपनागशती८००कपर्दकात्मकं
अशीति८०द्व्यूकात्मकंत्रयस्त्रिंशन्माषप्रमितरौप्यात्मकंनागशतसधिकषोडश
सहस्रवराटकात्मकं१६८००चधेनुमूल्यंभवति॥अस्मिन्विषयेऽन्येपिषट्त्रिं
शन्मतोक्ताःपक्षाःपूर्वमेवोक्ताः॥तेनविंशतिमाषप्रमित२०रौप्यात्मकंषोडश
माषप्रमितरौप्यात्मकंअर्धद्व्यूकात्मकअशीति८०कपर्दकात्मकंअष्टद्व्यूक
दात्मकंअशीसुन्नरषोडशशतवराटकात्मकं१६८००चधेनुमूल्यंभवति॥एतेषा
मपिपक्षाणांशास्त्रापेक्षयाकर्मापेक्षयावाव्यवस्थाज्ञेया॥अथाश्वमूल्यमाह॥अ
श्वेपंचदशौवत्विति॥पंचदशकार्षापणाअश्वमूल्यमित्यर्थः॥तत्रसार्द्धसप्त

ऽ॥ट्ढूकात्मकंघादशशतकपर्दैकात्मकं१२८विंशत्यधिकशत१२० ट्ढूकात्मकं
अष्टाचत्वारिंशा४८न्माषप्रमितरौप्यात्मकंशतद्वयाधिकैकोनविंशतिसहस्र
वराटकात्मकं१९२०० चाश्वमूल्यंभवति॥अथहिरण्यमूल्यमाह॥हिरण्येका
र्षापणकाः पणानवतयाधिकाइति॥अत्रकार्षापणकाइतिबहुवचनंत्रित्वे
पर्यवस्यति।तेननवपणाधिककार्षापणत्रयात्मकंहिरण्यमूल्यमित्यर्थः॥
अत्रकेचिदाधुनिकेनकार्षापणकइत्येकवचनांतपाठेमनसिधृत्वानवपणा
धिकैककार्षापणइत्यर्थ इतिव्याख्यानंकृतं॥तन्न।असंगत्वात्।अन्यथाप त
णानवतयाधिकाइतिबहुवचनंव्यर्थंस्यात्॥अतएवानंतदेवैर्दक्षिणादा राम
ननिर्णयेबहुवचनांतपाठेत्रिंशित्वानवपणाधिकास्त्रयः कार्षापणाइत्यर्थइ १४

स्तुकं।तेनसार्धाष्टाविंशति२८॥ट्ढूकात्मकंसार्धैकादशमाष११॥प्रमितरौप्या
त्मकंषष्ट्यधिकपंचचत्वारिंशच्छतवराटकाधपर्दात्मकंचहिरण्यमूल्यंभव
ति॥अथवस्त्रमूल्यमाह॥वस्त्रेकार्षापणइति॥एककार्षापणात्मकंवस्त्रमूल्य
मित्यर्थः।तेनार्धट्ढूकाऽऽत्मकंवाष्टशत८०० प्रमितकपर्दकात्मकंअष्टट्ढूकात्म
कंसपादत्रयेमाष३।प्रमितरौप्यात्मकंअभ्रगजसूर्यप्रमित१२८०वराटकात्म
कंचवस्त्रमूल्यंभवति॥अथछागमूल्यमाह।छागेषूपणाइति॥अष्टपणात्म
कंछागमूल्यमित्यर्थः॥तेनट्ढूकचतुष्टयात्मकंधर्मून्योदधिषट्प्रमितशत६०
कपर्दकात्मकंचछागमूल्यंभवति॥अथाविमूल्यमाह॥द्वादशाविकेइति।अ
त्रपणाइत्यनुवृत्तिः॥अविकेमेषेद्वादशपणामूल्यत्वेनभवंति॥अत्राजापेक्ष

मासार्द्धज्ञेयं। तेनषट्टङ्कात्मकंषष्ट्यधिकनवशत९६०वराटकात्मकंचाविमू
ल्यंभवति॥ अथवृषलीमूल्यमाह॥ वृषल्यामथपंचाशन्मूल्यंकार्षापणाःमू
ल्यत्वेनभवंति॥ तेनपंचविंशतिटङ्कात्मकं२५खखखाब्धिप्रमित४०००वरा
टकात्मकंशून्याभ्रवेदोन्मित४००टङ्कात्मकंषष्ट्युत्तरशतमाष१६०प्रमितरौ
प्यात्मकंआकाशाभ्रशून्याब्धिरसो४०००न्मितकपर्दकात्मकंचदासीमूल्यभ
वतीत्यर्थः॥ अथनिष्कमूल्यमाह। निष्केपंचाशदेवसुरिति। निष्कोभूषणविशे
षः। तस्यपंचाशत्कार्षापणात्मकंमूल्यमित्यर्थः॥ अत्रदासीमूल्यवत्टङ्कादि
ज्ञेयं॥ अथगजमूल्यमाह। गजेपंचशतानिति॥ कार्षापणा॥ इतिसर्वत्रकंठो
क्तंविनाःनुवृत्तिः॥ पंचशतकार्षापणात्मकंगजमूल्यमित्यर्थः॥ तेनसार्धश



तद्वय२५०टङ्कात्मकंचत्वारिंशत्सहस्रकपर्दकात्मकंशून्याभ्रखाब्धिमित४०००
टङ्कात्मकंषोडशशतमाषप्रमित१६००रूप्यात्मकखाभ्राभ्रखाब्धिरसोन्मित
६४०००वराटकात्मकंचदंतिमूल्यंभवति॥ अथदोलामूल्यमाह॥ पंचकार्षा
पणाःप्रोक्तादोलायामिति॥ दोलानामनरवाह्ययानं॥ पंचकार्षापणात्मकंदो
लामूल्यमित्यर्थः॥ अत्रसार्द्धद्वयटङ्कात्मकखशून्यवेदोन्मित४००कपर्द
कात्मकंचत्वारिंशत४०टङ्कात्मकंषोडशमाषप्रमित१६रूप्यात्मकंखाभ्रवेद
षड्ढ६४००वराटकात्मकंदोलामूल्यंभवति॥ अथरथमूल्यमाह॥ षट्रथेतथेति
। षट्कार्षापणात्मकंरथमूल्यमित्यर्थः॥ तेनटङ्कत्रयात्मकंगगनवसुवेदो
न्मित४८०कपर्दकात्मकंअष्टाचत्वारिंशत४८टङ्कात्मकंविंशति२०माषप्र

मितरूप्यात्मकंअशीसुत्तरं३६०षट्सप्ततिशतवराटकात्मकंचरथमूल्यंभव
ति॥अथगृहमूल्यमाह।गृहेष्टोकार्षापणकाइति॥~~अष्टकार्षापणात्मकंगृह~~
~~मूल्यमाह।गृहेष्टोकार्षापणकाइति~~॥अष्टकार्षापणात्मकंगृहमूल्यमित्यर्थः
।तेनद्यूकचतुष्यात्मकंखाद्यंगो६४०न्मितकपर्दकात्मकंचतुःषष्टि६४०द्यू
कात्मकंषट्विंशति२६माषप्रमितरौप्यात्मकंआकाशमुद्गगगनभून्मित
१२४०वराटकात्मकंचगृहमूल्यंभवति॥अथगवादिमूल्यविषयकमूल्याध्या
योक्ताःश्लोकाःसौकर्यार्थमेकत्रलिख्यंते॥द्वात्रिंशत्पणि कागावश्चतुःकार्षापणो
वरः॥वृषेषद्भार्षापणकाअष्टावनडुहिस्मृताः॥१॥दशकार्षापणाधेनावश्वे राम
पंचदशैवतु॥हिरण्येकार्षापणकाःपणानवतथाधिकाः॥२॥वस्त्रेकार्षापणश्चै १६

कश्छागेऽष्टौद्वादशाविके॥वृषल्यामथपंचाशन्मूल्यंकार्षापणाःस्मृताः॥३॥निष्के
पंचाशदेवस्युर्गजेपंचशतानितु॥पंचकार्षापणाःप्रोक्तादोलायांपट्टयेतथा
॥४॥गृहेष्टोकार्षापणकास्ताम्रेकार्षापणःस्मृतः॥ताम्रकर्षेऽपिचपणइतिमूल्य
प्रकल्पना॥५॥अधिकंकल्पयेन्मूल्यंन्यूनंवित्तानुसारतइति॥ ॥अथप्रसंगा
न्मानमुच्यते॥तत्परिभाषांलीलावत्यांभास्कराचार्यआह॥यवोदरैरंगुलम
ष्टसंख्यैर्हस्तोंगुलैःषड्भिरितश्चतुर्भिः॥हस्तैश्चतुर्भिर्भवतीहदंडःक्रोशःसह
स्रद्वितयेनतेषां॥६॥स्याद्योजनंक्रोशचतुष्टयेनतथाकराणांदशकेनवंशः।
निवर्त्तनंविंशतिवंशसंख्यैःक्षेत्रंचतुर्भिश्चभुजैर्निबद्धं॥७॥यवोदरैस्तिर्यग्य
वोदरैरष्टभिरंगुलंस्यात्॥अत्रयवोदरैरित्यनेनयवमध्यस्योत्सेधगृहीतंऊ

ध्वैस्त्रिभिर्ब्रीहिभिर्वा॥तथाचस्मृतिः॥तिर्यग्यवोदराण्यष्टावूर्ध्वावाब्रीहयस्त्रयश्च
ति॥अथतैरंगुलैश्चतुर्भिःषड्भिर्वितैर्हस्तोभवति॥चतुर्विंशतिभिरंगुलैर्हस्तइस
र्थः॥तथाचतुर्भिर्हस्तैरेकोदंडःस्यात्॥तथातेषांदंडानांसहस्रद्वयमेकःक्रोशः
स्यात्॥क्रोशानांचतुष्टयेनयोजनंस्यात्॥अथक्षेत्रपरिभाषोपक्रमंदर्शयति॥त
त्रमानंतरमाह॥करेणामिति॥करेणांहस्तानांदशकेनवंशःस्यात्॥तथाविंश
तिवंशसंख्यैश्चतुर्भिर्भुजैर्निवृक्षेत्रंनिवर्त्तनंभवति॥यथासमचतुरस्रंतुल्य
कर्णक्षेत्रंचतुर्भुजेषुविंशतिवंशप्रमाणेननिर्त्तनेनसमंक्षेत्रफलंतद्यंवंशचतुः
शतीमितंस्यात्२०[४००]२०करशतद्वयतुल्यानांचतुर्णामपिभुजानामंतवर्त्ति राम
नांसमभूमिर्निवर्त्तन२०मुच्यत२००[४००/२००]२००इत्यर्थः॥एवमत्रस्थलविशे १७

षेहस्तभेदोनास्तुशास्त्रेप्रतिपादितोस्ति॥सयथा॥ब्रह्मविष्णुशिवानांतुयेहस्ता
स परिकीर्त्तिताःषट्त्रिंशदधिकशतत्रयं३३६।वोन्मानैरंगुलैःस्युःक्रमादमी।सुरमूर्त्यग्नि
कुंडादिकुर्याद्ब्रह्मकरेणतु॥यजमानांगुष्ठपर्वप्रमाणेनाथकेचनाग्रासादवास
वेश्मानिविष्णुहस्तप्रमाणतः॥तडागारामक्षेत्राणिक्रोशाश्चशिवहस्ततइति॥अ
त्रोक्तोहस्तःसूत्रधारादीनांकर्महस्ततुल्यएवभवति।लोकेगजइत्युच्यतइति॥वि
धिगणितसारेपिअंगुलंसुज्ञाःस्वाष्टकमवोदरैःकरमितिसिद्धं२४गुलैस्तैर्भु
जं।वंशास्तद्दशकं९खखाष्टभि८००रिहक्रोशास्तुतैस्तद्द्वयंगव्यूतिर्युगलंहि
योजनमितिः३२००० पिंडोत्रतत्पंचकमिति।यदुलक्षणमुक्तंदिनकरद्योते
आदित्यपुराणे।जालांतरगतेभानौयत्सूक्ष्मंदृश्यतेरजः॥प्रथमंतत्प्रमाणानां

त्रस रेणुंप्रचक्षते॥त्रसरेणुस्तुविज्ञेयोअष्टौयेपरमाणवः॥त्रसरेणवस्तुतेह्य
ष्टौरथरेणुस्तुसस्मृतः॥रथरेणवस्तुतेष्टौचवालाग्रंतत्स्मृतंबुधैः॥वालाग्रंस्या
ष्टलिक्षातुयूकालिक्षाष्टकंतथा॥अष्टभिश्चांगुलंतिर्यक्यवानामुत्तमंम
तंहति॥निवर्त्तनस्यमानांतरमुक्तंदानमयूखेबृहस्पतिना॥दशहस्तोनदंडे
नत्रिंशद्दंडानिवर्त्तनमिति॥तेनकरशतत्रय३००तुल्यानांचतु३००°३००र्णो
मपिभुजानामंतवर्त्तिनीसमभूमिर्निवर्त्तनमुच्यतइत्यर्थः अस्यैवान्यैर्मानां
तरमुक्तंदिनकरद्योतेकर्मविपाकार्केचमत्स्यपुराणे॥दंडेनसप्तहस्तेनत्रिंश
द्दंडानिवर्त्तनमिति॥अत्रदशाधिकशतद्वय२१०करतुल्यानांचतुर्णामपि
२१०°२१०°२१०भुजानामंतवर्त्तिनीसमभूमिर्निवर्त्तनमुच्यतइति॥धर्मत्र बृ

नौनुबालवत्सकधेनूनांसहस्रंयत्रतिष्ठति॥तद्वैनिवर्त्तनंज्ञेयमितिशातातपो ब्र
वीदित्युक्तं॥इतिप्रकारकचतुष्टयेननिवर्त्तनलक्षणंनिरूप्येदानीगोचर्मल
क्षणमुच्यते॥तदुक्तंबृहस्पतिनोत्तरार्धेन॥दशातान्येवगोचर्मब्राह्मणेभ्योदद
तियइति॥तानिश्लोकोक्तानिनिवर्त्तनानि॥दशसंख्याकैर्निवर्त्तनैरेकंगोचर्मोच्यत
इत्यर्थः॥तत्रभास्कराचार्योक्तनिवर्त्तनानुसारेणकरसहस्रद्वय२०००तुल्या
नांचतु२०००°२०००र्णामपिभुजानामंतर्वर्त्तिनीसमभूमिर्गोचर्मोच्यतइति
॥मयूखेबृह २०००स्पुक्तनिवर्त्तनानुसारेणतुकरसहस्रत्रय३०००तुल्या
नांचतुर्णाम३०००°३०००पिभुजानामंतर्वर्त्तिनीसमभूमिर्गोचर्मेति॥मत्स्य
पुराणोक्तनिवर्त्तनानुसारेणतुकरैकविंशतिशत२१००तुल्यानांचतुर्णामपि

भुजानामंतवर्त्तिनीसम२१०० २१०० २१०० भूमिर्गोचर्मेति॥इदमेवबृहत्पुक्त
मानात्त्रिभागहीनंभवतीतितत्रैवोक्तं॥त्रिभागहीनंगोचर्ममानमाहप्रजापति
रितिप्रत्यक्षंदृश्यतेच॥अन्यदपिगोचर्मलक्षणमुक्तंमयूखेमहीदानप्रक
णेगवांशतंवृषश्चैकोयत्रतिष्ठेदयंत्रितः।तद्धिगोचर्ममात्रंतुप्राहुर्वेदविदो
जनाइति।अन्यदपिकर्मविपाकार्केवसिष्ठेनोक्तं॥दशहस्तेनदंडेनदशदंडा
न्समंततः॥पंचकाभ्यधिकान्दद्यादेतद्गोचर्मचोच्यतइति॥अत्रकेचित्॥गोच
र्ममात्रकमित्यत्रगोचर्मविषयकमात्रशब्दप्रयोगाद्गोचर्मणःप्रावत्परिमिता
भूमिर्व्यापाभवतितद्गोचर्मेत्युच्यतइत्यनेनलक्षणेनसमचधुर्यधनुरत्रच राम
नुर्हस्तपरिमिताभूमिर्गोचर्मसंज्ञकेत्याहुः॥दिनकरद्योतेगार्गभट्टास्तुदश १९

दानप्रकरणेभूमानंप्रकृत्यगोचर्मदशहस्तापंचहस्तावेत्याहुः१०२१०५ २५
अत्रनानागोचर्मप्रकारेषूत्तममध्यमाधमभावेनव्यवस्थाज्ञेयेतिमयूखकारः
गोचर्ममानमनेकप्रकारमुक्तंतत्रफलतारतम्यंकल्प्यमितिद्योतकारः॥अन्ये
तुदशहस्तपंचहस्तादिगोचर्ममानंशात्यादिलघुकर्मविषयंबृहन्मानंतुम
ध्यादिप्रदानविषयमितिव्यवस्थांजगदुः॥युक्ताचैषाव्यवस्था॥इतिभूमा
नं॥अधुनाधान्यमानमुच्यते॥तत्रतावद्धस्तमाननिरूपणप्रसंगेनमागधी
यधान्यमान्यपरिभाषामप्याहलीलावत्यांभास्कराचार्यैः॥हस्तोन्मितैर्विस्तृति
दैर्घ्यपिंडैर्यद्दारुशास्त्रंघनहस्तमानं॥धान्यादिकेनतद्घनहस्तमानंशास्त्रोदि
तामागधखारिकासा॥१॥द्रोणस्तुखार्योःखलुषोडशांशःस्यादाढकोद्रोणच

तुर्यभागः॥प्रस्थश्चतुर्थोंशश्चाढकस्यप्रस्थांघ्रिराद्यैःकुटपःप्रदिष्टः॥२॥अ
स्यार्थः। हस्तोन्मितैर्हस्तप्रमाणैर्विस्तृतिर्दैर्घ्यपिंडैर्यैर्तद्द्वादशास्त्रसंज्ञंखातंभव
तितद्धान्यादिकेघनहस्तमानंस्यादित्यन्वयः॥विस्तृतिर्व्यासः॥दैर्घ्यंआयामः
पिंडोजाड्यंऔच्चंवाधोवेत्यर्थः। द्वादशअस्त्रयोधाराःयस्यतत्द्वादशास्त्रं॥ह
स्तेनोन्मितैःऊर्ध्वोन्मितैःउन्मानंऊर्ध्वमानमुच्यते॥तथोक्तंक्रियाप्रसादे॥
ऊर्ध्वमानंबिलोन्मानंपरिमाणंतुसर्वतः॥आयामस्तुप्रमाणंस्यात्संख्यावाद्या
तुसर्वतश्चितिर्विस्तारेपिंडेदैर्घ्येचहस्तप्रमाणंयत्कुंडवत्खातंतदधश्चतुरस्रंम
ध्येचचतुरस्रंमुखेपिचतुरस्रंएवंद्वादशधारंभवतितस्यघनहस्तमानमिति
संज्ञासैवमागधखारिकाशास्त्रोदिता॥मीयतेधान्यादिअनेनेतिमानंकुटया



दियनहस्तएवमानंघनहस्तमानंधान्यादिविषयेयत्घनहस्तमानंतत्प्रमाणंमा
गधदेशीयाखारिका॥उक्तक्षेत्रंयावत्नाधान्येनदृश्यतेसामागधदेशीयाखारि
काभवतीत्यर्थः॥मागधदेशोशोणभद्रतदाश्रितःप्रसिद्धःद्रोणइति॥खार्यःषोड
शांशोद्रोणःप्रोक्तः॥तस्यद्रोणस्यचतुर्थोभागः॥आढकःस्यात्॥तथाआढक
स्यचतुर्थोभागःप्रस्थःप्रोक्तः॥तथाआद्यैर्गणकैःश्रीधराद्यैःप्रस्थांघ्रिःकुटपः
प्रदिष्टः॥तन्मानंतुश्रीधराचार्यैरुक्तं॥सार्धवेधांगुलंत्रीणिकुटपैर्दैर्घ्यविस्तृता
इति।कुटपोकाष्टमयमानेनसार्धांगुलंवेधः॥त्रीणिश्रंगुलानिदैर्घ्यं॥अंगु
लत्रयात्मकेविस्तृतिःअत्रक्षेत्रफलंवेधगुणंखातेघनहस्तसंख्यास्यात्॥
अस्यार्थः॥एवंसमखातेज्ञातेतत्रदैर्घ्यविस्तारयोर्घातःक्षेत्रफलंभवति॥एवं

मत्क्षेत्रफलंस्यात्तद्धेनगुणितंसत्खातेघनहस्तसंख्यास्यादित्यनेनदैर्घ्यविस्तारउत्सेधैःएवंधेनगुणिता१३।जातानिसार्धत्रयोदशगुलानिकुटपमानं॥तानिचतुर्गुणानिप्रस्थमानमं गुलानि५४चतुःपंचाशत्॥तानिचतुर्गुणानिआढकमानमंगुलशतद्वयंषोडशाधिकं२१६एतच्चतुर्गुणंद्रोणमानंशताष्टकंचतुःषष्ट्यधिकमंगुलात्मकं८६४॥तत्षोडशगुणंखारिकामानंचतुर्विंशाष्टशताधिकत्रयोदशसहस्रांगुलानि१३८२४।एतत्प्रकारांतरोक्तवैद्यकशास्त्रोक्तमानपरिभाषयानविरुध्यते॥तथाहि॥वैद्यकेसप्तगुंजात्मकोमाषःचतुर्माषैःशाणःतैश्चतुर्भिःकर्षःतैश्चतुर्भिःपलंतैश्चतुर्भिःकुटमः॥एकादशटङ्कैकसम१॥तोलिकः।लोकेप्राह्यतुलाभाषयालघुशैरतुल्योयंभवति।तैश्च



चतुर्भिःप्रस्थःतैश्चतुर्भिःआढकः।तैश्चतुर्भिर्द्रोणःउक्तं॥अयंद्रोणो घनहस्तपूरणधान्यस्यषोडशांशेनसमएवप्रत्यक्षंदृश्यते॥तैःषोडशभिःखारिकेति१६४॥गोपथब्राह्मणेतु॥पंचकृष्णलकोमापस्तैश्चतुःषष्टिभिःपलं॥पलैर्द्वात्रिंशद्भिःप्रस्थोमागधेषुप्रकीर्त्तितः॥आढकैस्तैश्चतुर्भिश्चद्रोणःस्याच्चतुराढकइत्युक्तं॥तेनचतुःषष्टिटङ्कैसमतोलिकःप्रस्थःआढकः२५६।द्रोणः१०२४।खारी१६३८४॥इतिप्रकारद्वयेनमागधदेशीयधान्यमानमुक्त्वेदानींसर्वदेशसाधारणमाह॥भविष्यपुराणे॥पलद्वयंतुप्रसृतंद्विगुणंकुडवंमतं॥चतुर्भिःकुडवैःप्रस्थःप्रस्थाश्चत्वारआढकः॥आढकैस्तैश्चतुर्भिश्चद्रोणस्तूक्तोबुधैः।कुंभोद्रोणद्वयंशूर्पःखारीद्रोणास्तुषोडशेति॥द्रोणद्वयस्यैवसंज्ञांतरंशूर्पइतो

तिदिनकरोद्योतकारः॥अत्रविंशतिमाषात्मकंटङ्कमानंचतुश्चत्वारिंशत्टङ्क
कात्मकंशरमानंचपुरस्कृत्यन्यासःक्रियते॥तत्रटङ्कचतुष्टयसमतोलितंधर्म
तमानं॥अष्टटङ्कसमतोलितंटंकुडवमानं॥द्वात्रिंशद्टङ्कसमतोलितंश्र
प्रस्थमानं॥इदंकिंचिन्न्यूनपादोनसेरात्मकंभवति॥अष्टाविंशत्यधिकशतटङ्क
कसमतोलितंश्रआढकमानं॥इदंकिंचिन्न्यूनसेरत्रयात्मकं॥द्वादशाधि
कपंचशतटङ्कसमतोलितंपश्रद्रोणमानं॥इदंकिंचिदधिकसार्धैकादश
शेरात्मकंभवति॥चतुर्विंशत्यधिकसहस्रटङ्कसमतोलितंश्रकुंभमा
नं॥इदंसपादत्रयोविंशति२३सेरात्मकंभवति॥इदमेवश्रूर्पमानं॥नेत्रनंदश्च रामा
षटङ्कसमतोलितंखारीटंश्रमानं॥इदंकिंचिन्न्यूनसपादषडष्टभूपरिमि २२

तश्रद्वासेरात्मकंभवति॥अ षट्चत्वारिंशछेरोन्मित॥धटमणप्रमाणेनषट्सेरोणा
श्चत्वारोमणाःधखारिकामानं३॥२॥श्रीपुरनगरेभवति॥एवंस्वस्वग्रामीयमा
नानुसारेणन्यूनाधिकमणात्मकंखारिकामानंसुधीभिश्चिंतनीयं॥विरुधर्मो
नरेपि॥पलंचकुडवःप्रस्थआढकोद्रोणएवच॥धान्यमानेपुवोढव्याःक्रमशो
मीचनुर्गुणाः॥द्रोणैःषोडशभिःखारीविंशत्याकुंभउच्यते॥कुंभैस्तद्दशभिर्वो
होधान्यसंख्याप्रकीर्त्तितेति॥विंशत्यत्रद्रोणेरितिसंबंध्यते॥तथाचकुंभोद्रोण
द्वयमितिपक्षाद्विंशतिद्रोणपरिमितःकुंभइतिपक्षांतरं॥पलसहस्रमितःकुं
भइत्यपिपक्षांतरंज्ञेयमितिमयूखकारः॥पंचसहस्रपलमितोवाकुंभइतिदान
विवेककारः॥तेनगगनाब्धिनेत्रदिक्१२४०टङ्कसमतोलितंकुंभमानं॥इदंपा

दोनत्रयस्त्रिंशदधिकशतद्वय२३३॥सेरात्मकंभवति॥अत्रापिश्रीपुंन
गरस्थाःपूर्ववन्मणेनसप्तसेरोणाःपंचमणाः४॥१॥कुंभमानंभवति
॥खशून्यजिनदिक्१०२४००टङ्ककसमतोलितंवासंज्ञकंमानं॥इदंसपाद
सप्तविंशत्यधिकत्रयोविंशतिशत २३२७।० सेरात्मकंभवति॥अत्रापिपूर्
ववन्मणेनसार्धाष्टाचत्वारिंशत्परिमिताःमणाःवाहमान४८॥०मिति
सहस्रद्वयटङ्ककसम२०००तोलितंवाकुंभमानं॥इदंकिंचिन्न्यूनसार्धपं
चचत्वारिंशा४५॥च्छेरात्मकंभवति॥अत्रापिपूर्ववत्सार्धद्वयसेरोणितेको
मणःदशसहस्रटङ्ककसमतोलितं१००००वाकुंभमानं॥इदंसपादसप्तविं
शत्यधिकशतद्वय२२७।०सेरात्मकंभवति॥अत्रापिपूर्ववत्पादोनपंचम

णाम २३

णाः४॥०कुंभमानंभवतीत्यर्थः॥वाराहेतु॥पलद्वयंतुप्रस्तंमुष्टिरेकपलंस्म
तं॥अष्टमुष्टिभवेत्किंचित्किंचिदष्टौतुपुष्कलं॥पुष्कलानिचचत्वारिआढक
ःपरिकीर्त्तितः॥चतुराढकोभवेद्द्रोणइत्येतन्मानलक्षणमित्युक्तं॥तेनटङ्क
कचतुष्टयसमतोलितंप्रस्तमानं॥टङ्ककद्वयसमतोलितंमुष्टिमानं२।षो
डशाष्टटङ्कसमतोलितंकिंचिन्मानं॥अष्टाविंशत्यधिकशत१२८टङ्क
समतोलितंपुष्कलमानं॥इदंकिंचिन्मूनसेरत्रयात्मकंभवति॥द्वादशाधि
कपंचशतटङ्क५१२समतोलितंआढकमानं॥इदंकिंचिदधिकसार्द्धका
दशसेरात्मकं१९॥भवति॥अष्टचत्वारिंशदधिकसहस्रद्वय२०४८

छूकसमतोलितंद्रोणमानं॥इदंकिंचिदधिकसार्द्धषट्चत्वारिंशध६॥ त्सेरा
त्मकंभवति॥अत्रापिपूर्वप्रकारेणसार्द्धैकसेराणितैकोमणः॥॥३॥ द्रोणा
समानंभवति॥यदुक्तंस्कांदे॥पलद्वयेनप्रसृतंद्विगुणंकुडवंमतं॥चतुर्भिः
कुडवैःप्रस्थआढकस्तैश्चतुर्गुणैः॥चतुराढकोभवेद्रोणइत्येतन्मानल क्ष
णमिति॥तद्भविष्यपुराणोक्तमानसदृशत्वान्नपृथक्व्याख्यातं॥एतेषांप
क्षाणांशक्तिदेशकालाद्यपेक्षयाव्यवस्थेतिमयूखकारः॥इव्यविशेषे
प्रस्थमानमुक्तंदिनकरद्योते॥७॥लाजापायसनालिकेरसलिलेसक्षे रम
जलेकांजिकेघात्रिंश३२त्पलिकःपलैर्धृतिमितैः१८प्रस्थोगुडेसंमतः॥ २४

तैलक्षौद्रघृतेषुविंशतिपलै२०र्दध्नस्तुपंचोत्तरैः२५प्रस्थःक्षीरगतोबुधै र्नि
गदितस्त्रिंशत्पलैरेवतु॥९॥अस्यार्थैःस्पष्टएव॥ द्रोणाढकयोर्मानांतरमु
क्तमाचारदीपेपराशरेण॥प्रस्थाश्चविंशतिर्द्रोणः२२स्मृतोद्विःप्रस्थआढक
इति॥अत्रबहुवक्तव्यमपिग्रंथविस्तरभीतेर्योदकाभावाच्चनोच्यतइतिदि
क्॥इतिश्रीश्रीपुरनगरस्थवैष्णवोपनामकबालकृष्णात्मजविट्ठलेनविर
चितायांमूल्यायत्नोद्वितीयस्तरंगः॥२॥ ॥श्रीरामायनमः॥॥



Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिमल्याध्यायवृत्तिः॥
द्वितीयस्तरंगः॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY